# ॥ वाली-सुग्रीव-कथा ॥

## श्री-राम उवाच

वालिसुग्रीवयोर्जन्म श्रोतुमिच्छामि तत्त्वतः।
रवीन्द्रौ वानराकारौ जज्ञाताविति नः श्रुतम् ॥ १ ॥

## अगस्त्य उवाच

मेरोः स्वर्णमयस्याद्रेर्मध्यशृङ्गे मणिप्रभे।
तस्मिन् सभाऽऽस्ते विस्तीर्णा ब्रह्मणः शतयोजना ॥ २ ॥

तस्यां चतुर्मुखः साक्षात्कदाचिद्योगमास्थितः।
नेत्राभ्यां पतितं दिव्यमानन्दसलिलं बहु ॥ ३ ॥

तद्गृहीत्वा करे ब्रह्मा ध्यात्वा किञ्चित्तदत्यजत्।
भूमौ पतितमात्रेण तस्माज्जातो महाकपिः ॥ ४ ॥

तमाह द्रुहिणो वत्स किञ्चित्कालं वसात्र मे।
समीपे सर्वशोभाढ्ये ततः श्रेयो भविष्यति ॥ ५ ॥

इत्युक्तो न्यवसत् तत्र ब्रह्मणा वानरोत्तमः।
एवं बहुतिथे काले गते ऋक्षाधिपः सुधीः ॥ ६ ॥

कदाचित्पर्यटन्नद्रौ फलमूलार्थमुद्यतः।
अपश्यद्दिव्यसलिलां वापीं मणिशिलान्विताम् ॥ ७ ॥

पानीयं पातुमागच्छत् तत्र छायामयं कपिम्।
दृष्ट्वा प्रतिकपिं मत्वा निपपात जलान्तरे ॥ ८ ॥

तत्रादृष्ट्वा हरिं शीघ्रं पुनरुत्प्लुत्य वानरः।
अपश्यत् सुन्दरीं रामामात्मानं विस्मयं गतः ॥ ९ ॥

ततः सुरेशो देवेशं पूजयित्वा चतुर्मुखम्।
गच्छन् मध्याह्नसमये दृष्ट्वा नारीं मनोरमाम्॥ १०॥

कन्दर्पशरविद्धाङ्गस्त्यक्तवान् वीर्यमुत्तमम्।
तामप्राप्यैव तद् बीजं वालदेशेऽपतद्भुवि॥ ११॥

वाली समभवत् तत्र शक्रतुल्यपराक्रमः।
तस्य दत्त्वा सुरेशानः स्वर्णमालां दिवं गतः॥ १२॥

भानुरप्यागतस्तत्र तदानीमेव भामिनीम्।
दृष्ट्वा कामवशो भूत्वा ग्रीवादेशेऽसृजन्महत्॥ १३॥

बीजं तस्यास्ततः सद्यो महाकायोऽभवद्धरिः।
तस्य दत्त्वा हनूमन्तं सहायार्थं गतो रविः॥ १४॥

पुत्रद्वयं समादाय गत्वा सा निद्रिता क्वचित्।
प्रभातेऽपश्यदात्मानं पूर्ववद्वानराकृतिम्॥ १५॥

फलमूलादिभिः सार्धं पुत्राभ्यां सहितः कपिः।
नत्वा चतुर्मुखस्याग्रे ऋक्षराजः स्थितः सुधीः॥ १६॥

ततोऽब्रवीत् समाश्वास्य बहुशः कपिकुञ्जरम्।
तत्रैकं देवतादूतमाहूयामरसन्निभम्॥ १७॥

गच्छ दूत मयाऽऽदिष्टो गृहीत्वा वानरोत्तमम्।
किष्किन्धां दिव्यनगरीं निर्मितां विश्वकर्मणा॥ १८॥

सर्वसौभाग्यवलितां देवैरपि दुरासदाम्।
तस्यां सिंहासने वीरं राजानमभिषेचय॥ १९॥

सप्तद्वीपगता ये ये वानराः सन्ति दुर्जयाः।
सर्वे ते ऋक्षराजस्य भविष्यन्ति वशेऽनुगाः॥ २०॥

यदा नारायणः साक्षाद्रामो भूत्वा सनातनः।
भूभारासुरनाशाय सम्भविष्यति भूतले॥ २१॥

तदा सर्वे सहायार्थे तस्य गच्छन्तु वानराः।
इत्युक्तो ब्रह्मणा दूतो देवानां स महामतिः॥ २२॥

यथाऽऽज्ञप्तस्तथा चक्रे ब्रह्मणा तं हरीश्वरम्।
देवदूतस्ततो गत्वा ब्रह्मणे तन्न्यवेदयत्॥ २३॥

तदादि वानराणां सा किष्किन्धाऽभून्नृपाश्रयः॥ २४॥

सर्वेश्वरस्त्वमेवासीरिदानीं ब्रह्मणार्थितः।
भूमेर्भारो हृतः कृत्स्नस्त्वया लीलानृदेहिना।
सर्वभूतान्तरस्थस्य नित्यमुक्तचिदात्मनः॥ २५॥

अखण्डानन्तरूपस्य कियानेष पराक्रमः।
तथाऽपि वर्ण्यते सद्भिर्लीलामानुषरूपिणः॥ २६॥

यशस्ते सर्वलोकानां पापहत्यै सुखाय च।
य इदं कीर्तयेन् मर्त्यो वालिसुग्रीवयोर्महत्॥ २७॥

जन्म त्वदाश्रयत्वात् स मुच्यते सर्वपातकैः॥ २८॥

॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे उत्तरकाण्डे तृतीये सर्गे वाली-सुग्रीव-कथा सम्पूर्णा॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Vali_Sugriva_Katha.

generated on **May 9, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits